# Shri Ganga Stuti

# श्रीगङ्गास्तुतिः

## Document Information

Text title : Shri Ganga Stuti 6

File name : gangAstutiH6.itx

Category : devii, shrIdharasvAmI, stuti

Location : doc_devii

Author : Shridharasvami

Proofread by : Manish Gavkar

Description/comments : shrIdharasvAmI stotraratnamAlikA

Latest update : February 11, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 12, 2023

*sanskritdocuments.org*

# श्रीगङ्गास्तुतिः

श्रीहरेश्चरणाम्बुजनिःसृता मङ्गला शिवमस्तकशोभना ।
पावना भवदुःखविनाशिनी भक्तिदा सुखदा परमुक्तिदा ॥ १॥

पापहं भवतापविनाशकं शान्तिदं सुखदं परमुक्तिदम् ।
अम्ब ते सलिलं परमामृतं मज्जनं तव भूमि सुखात्मकम् ॥ २॥

किं वर्णयामि जगदम्ब तवात्र चित्रं
माहात्म्यमेतदतिशुद्धमनन्तवीर्यम् ।
शुद्धात्मभिः सकलविद्भिरपारकीर्तिः
संस्तूयते परमदिव्यपदैः पवित्रैः ॥ ३॥

प्रभातसमयच्छविस्तव शुभे महाह्लादिनी
मनः प्रशमनङ्करा सकलपावनी ज्ञानदा ।
सुरर्षिमुनिसेवितं तव तटं निमज्याप्सु ते
पुनाति हृदयं तथा सकलपापिनां तत्क्षणात् ॥ ४॥

क्वचिच्छ्रुतिमनोहरं स्तवनमम्ब ते श्रूयते
क्वचित्तवतटीश्रुतिश्रवणमङ्गला सस्वरा ।
क्वचित्स्तिमितलोचना बुधजनाः समाधिस्थिताः
क्वचित्तव जलाञ्जलिं परिभृता जना भूसुराः ॥ ५॥

उद्यद्भास्कररश्मयः सुविमलाः सक्तास्त्वदीये जले
विश्वाभासनमम्बकार्यमखिलं कर्तुं भुवः प्रस्थिताः ।
दिव्याकुङ्कमपूजनप्रसरिता रक्ताङ्गवर्णप्रभा
काप्युल्लासकरी सतां विजयते या शर्मदा पावनी ॥ ६॥

सुपुष्टफलभारतः प्रविनताः सुवृक्षा इमे
महोन्नतिशिरस्थितां सुजनसंस्थितिं त्वत्तटे ।
स्थिताः परमशोभितास्सपदि दर्शयन्तो मुदा

त्वदीयतटसंस्थिता सुखघनवनश्री सदा ॥ ७॥

ग्रामा ग्रामजनास्तथैव पशवो ये पक्षिणस्त्वत्तटे
धन्यास्ते परिपोषिताः सुविमलास्त्वत्स्नानपानादिभिः ।
धन्यास्ते मुनयः समाश्रितपदे वैराग्यवृत्तास्सदा
ज्ञानान्मोक्षसुखैः सुतृप्तिनिलयाः सम्पद्युताः पामराः ॥ ८॥

गङ्गे त्वदीयपदपङ्कजमात्मतृप्त्या
ध्यात्वाहमप्यविचलः सुखभूमरूपम् ।
त्वं ब्रह्मरूपसकलात्मसुखं विधात्री
राराजसे सुविमला भुवि ब्रह्मरूपा ॥ ९॥

इति श्रीमत् परमहंसपरिव्राजकाचार्य सद्गुरु भगवान्
श्रीधरस्वामीमहाराजविरचिता श्रीगङ्गास्तुतिः सम्पूर्णा ।
रचनास्थानं - श्री क्षेत्र वरदपुर, संवत्सर - १९७२

Proofread by Manish Gavkar

*Shri Ganga Stuti*
pdf was typeset on February 12, 2023

Please send corrections to *sanskrit@cheerful.com*